## षष्ठः पाठः

CDTJZC

**धरित्री रक्षत**



इयं धरित्री। अस्माकं मातृस्वरूपा। धरातले नद्यः पर्वताः वनानि अपि सन्ति। सूर्यः,चन्द्रमा, पवनः, जलं प्रकृतिप्रदत्तानि सन्ति। इमानि अस्मान् पोषयन्ति।मनुष्यः स्वार्थवशात् प्राकृतिकसंसाधनानां दुरुपयोगं करोति। क्रमेण एतानि संसाधनानि विनष्टानि दुषितानि च भविष्यन्ति। अधुना विश्वस्य वर्धमाना जनसंख्या शोचनीया। जनानाम् निवासाय वनानि छित्वा भवनानि निर्मीयन्ते। वृक्षाः प्राणवायुं ददति। वृक्षाणां विनाशेन पर्यावरणं प्रदूषितं भवति। प्रकृतेः सौन्दर्यं विलुप्तं भवति।पर्यावरणस्य विकारेण विपत्तयः आयान्ति। अतः विपत्तीनां निवारणाय अस्माभिः वसुधायाः रक्षणं कर्तव्यम्। यदा वसुधा रक्षिता तदा मानवजीवनमपि सुरक्षितं भवति। सत्यमेवोक्तम्-

‘माता भूमिः पुत्रोऽहं पृथिव्याः।’

**शब्दार्थः**

**प्रदत्तानि** =प्रदान करती है। **तत्सर्वम्**= ये सभी। **मातृस्वरुपा** = माता के समान। **स्वगर्भे** = अपने अंदर। **क्रियमाणः**= करते हुए। **विनष्टानि** = समाप्त हो जाना। **छित्वा**= काटकर।

**अविचारितेन**= बिना विचार किये हुए। **गरीयसीत**= बढ़कर। **पृथिव्याः**=पृथिवी के। **समापतन्ति**= आ जाती हैं।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

सर्वव्यापिनी, प्रदत्तानि, क्रियमाणः, समापतन्ति।

**2. एकपदेन उत्तरत-**

यथा- का अस्माकम् मातृस्वरूपा ? धरित्री

(क) धरातले कानि सन्ति ?

(ख) कस्याः सौन्दर्यं विलुप्तं भवति ?

(ग) शुद्धप्राणवायुं के ददति ?

(घ) विपत्तीनां निवारणाय कस्याः रक्षणम् आवश्यकम् ?

**3. पूर्णवाक्येन उत्तरत-**

यथा- पृथिव्याः अपरं नाम किम् ? पृथिव्याः अपरं नाम धरित्री।

(क) प्राकृतिकसंसाधनानां दुरुपयोगं कः करोति ?

(ख) पर्यावरणस्य महती हानिः कथं भवति ?

(ग) का सर्वथा वन्दनीया सेवनीया च ?

**4. मञ्जूषातः उचितविशेषणशब्दान् चित्वा वाक्यानि पूरयत-**

प्रदूषितम्, मातृस्वरूपा, जनसंख्या, रक्षणम्।

यथा- इयं अस्माकम् मातृस्वरूपा।

(क) अधुना विश्वस्य वर्धमाना.......................शोचनीया।

(ख) अस्माभिः वसुधायाः......................................कर्तव्यम्।

(ग) वृक्षाणां विनाशेन पर्यावरणं.........................भवति।

**5. चित्रानुसारं संस्कृतवाक्यानि रचयत-**

उद्याने एकः आम्रवृक्षः अस्ति।

...............................

.............................

............................

**6.संस्कृत भाषायाम् अनुवादं कुरुत-**

(क) यह पृथ्वी हमारी माता के समान है।

(ख) इस पृथ्वी को वसुधा भी कहते हंै।

(ग) हम सूर्य से ऊर्जा पाते हैं।

(घ) माता और मातृभूमि स्वर्ग से भी बढ़कर हैं।

(ड.) हम सूर्य से ऊर्जा पाते हैं।

**7-पाठात् शब्दं चित्वा स्वमित्रैः सह अन्त्याक्षरीं कुरुत-**

यथा-**प्रथम वर्ग    द्वितीय वर्ग**

पवनः  नद्यः

यदा  दूषितानि

**शिक्षण-सङ्केतः**

1-इण्टरनेट माध्यमेन पृथिवीदिवसस्य विषये चर्चां कारयत।

2- अप्रैलमासस्य द्वाविंशतारिकायां 'विश्वपृथिवीदिवस' इति।

3-'वसुधां रक्षत, जीवनं रक्षत' इति सूक्तिवाक्येन स्वकल्पनया चित्रनिर्माणं कुरुत।

4- वसुधारक्षणं कथं भविष्यति इति विषये स्वविचारं हिन्दीभाषायां लिखत।

## एतदपि जानीत-

### कुछ फलों के संस्कृत नाम-

हिन्दी  संस्कृत

- **आम**  आम्रम्
- **जामुन**  जम्बूफलम्
- **फूँट**  स्फुटी
- **अनार**  दाडिमम्
- **कटहल**  पनसम्
- **कन्द**  कन्दः
- **शरीफा**  सीताफलम्
- **सिंघाड़ा**  शृङ्गाटकः
- **बेर**  बदरी
- **केला**  कदली फलम्

- **किशमिश** क्षुद्रद्राक्षा
- **इमली** अम्लिका
- **मूँगफली** मण्डपी
- **अमड़ा** आम्रातकम्
- **बादाम** बादामम्
- **आँवला** आमलकम्
- **खजूर** खर्जूरम्
- **निम्बू** निम्बूकम्
- **छुहाड़ा** शुष्कखर्जूरम्
- **दाख/मुनक्का** द्राक्षा
- **अखरोट** अक्षौटकम्
- **ककड़ी** कर्कटी
- **अंगूर** द्राक्षा
- **खरबूजा** खर्बूजः
- **सेव** बदरम्,
- **नारियल** नारिकेलम्
- **नाशपाती** रुचिफलम्
- **नारंगी** नारंगम्

**स्मरणीयम्-**

स्वच्छं रक्ष

स्वच्छं रक्ष जलं जलपात्रम्

स्वच्छं रक्ष समस्तं गात्रम्।

स्वच्छं रक्ष सकल-परिधानम्

स्वच्छं रक्ष निवास-स्थानम्।।